श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अम्मासत्रं शेषाद्र्याचार्य विरचितम्

# ॥ श्री गोपालार्यमहादेशिकमङ्गळम् ॥

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महादेशिकाय नमः

# ॥ श्री गोपालार्यमहादेशिकमङ्गळम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वेदान्त लक्ष्मणमुनिं श्रीहयास्यस्वरूपिणम्।
अण्णयार्यपदाम्भोजभृङ्गं मद्गुरुमाश्रये॥

ज्ञानानुष्ठानवैराग्यनिधये गुणसिन्धवे।
त्रय्यन्तदेशिकायास्तु गोपालार्याय मङ्गळम्॥ १ ॥

विक्रमे कन्यकामासि पूर्वाषाढे गुणोत्तरे।
आत्रेयकुलतुङ्गाब्धौ अवतीर्णाय मङ्गळम्॥ २ ॥

त्रय्यन्तलक्ष्मणमुनेः यतिशेखररूपिणः।
लब्धागमान्तयुग्माय गोपालार्याय मङ्गळम्॥ ३ ॥

कुम्भघोणाख्यनगरं शार्ङ्गराजनिषेवितम्।
यन्नित्यवासतो दिव्यधामभूत् तस्य मङ्गळम्॥ ४ ॥

श्रीशठारियतीशानदेशिकांशतया ह्ययम्।
संरक्षणायावतीर्णः इत्युक्तायास्तु मङ्गळम्॥ ५ ॥

श्रीनाथयामुनाचार्य लक्ष्मणार्यमुनित्रयम्।
अंशेन यतितां प्राप्य यं श्रितं तस्य मङ्गळम्॥ ६ ॥

रहस्यत्रयसाराब्धि मन्थनोत्थसुधामयी।
येन सारास्वादिनी सा रचिता तस्य मङ्गळम्॥ ७ ॥

सर्वचेतनसर्वार्थ सिद्धिदो येन निर्मितः।
निक्षेपचिन्तामणिराट् तस्मै सेव्याय मङ्गळम्॥ ८ ॥

www.prapatti.com

आह्निक ध्यानसोपान दशनिर्णयकारिणे।
हृत्पद्मस्थश्रीहयास्य पदहंसाय मङ्गळम्॥ ९ ॥

त्रयी चूडार्यनाम्नां यः सहस्रमकरोद्गुरुः।
विष्णुचित्तादिगाथार्थ दायिनस्तस्य मङ्गळम्॥ १० ॥

यत्सम्प्रदायनिष्णाताः ज्ञानानुष्ठानराशयः।
पवित्रयन्ति गुरवो लोकांस्तस्यास्तु मङ्गळम्॥ ११ ॥

यशस्सत्कार लाभेच्छा वर्जितो भगवज्जने।
नित्यदासो निर्ममो यः सर्वज्ञस्तस्य मङ्गळम्॥ १२ ॥

गार्हस्थ्ये प्राप्तवेदान्त परमैकान्तिनां मुदे।
चरमे हंसतां प्रातो यस्तस्मै मङ्गळं सदा॥ १३ ॥

यो कीर्तयन्ति शेषाद्रिवर्योक्तं मङ्गळं त्विदम्।
तेषां नित्यमङ्गळं स दद्यात् गोपालदेशिकः॥ १४ ॥

मुनित्रय नमस्कृते निखिललोक सञ्जीवन-
त्रयीमकुट देशिक प्रवर दिव्य रूपे गुरौ।
उदारगुणसागरे कलितमिस्रहृत्भास्करे
रतिर्मम सदा भवत्वमितभूम्नि गोपालके॥ १५ ॥

श्रीमान् गोपालसूरिर्हयवदन कृपालम्भिताश्चर्यभूमा-
प्रज्ञाचारित्रशान्तिप्रभृति कुसुमसन्तानकल्पद्रुमः स्तात्।
त्रय्यन्तार्यावतारः सकलनतजनोज्जीवने बद्ध दीक्षः
यच्छन् त्रिभ्यो मुनिभ्यो श्रुतिमकुटगुरोः संप्रदायं श्रियै नः॥ १६ ॥

श्रीमुनित्रय सिद्धान्त पद्मिन्युल्लासभास्करः।
गोपालदेशिकः श्रीमान् जेजीयात् सन्ततं भुवि॥ १७ ॥

॥ इति गोपालार्यमहादेशिकमङ्गळं संपूर्णम्॥